DOIs:10.2018/SS/202508009 --:-- Research Paper / Article / Review

# लौकिकसंस्कृतसाहित्ये जातीयताबोध:

**Durbadal Mandal**

Assistant Professor in Sanskrit, Sister Nibedita Government General Degree College for Girls,
Kolkata – 700027, West Bengal, India
Under
West Bengal Education Service
Email - durbadalmandalsanskrit@gmail.com

**सारांश :** विभिन्नधर्माचार्यानां युगे युगेत्राविर्भावादियं इयं भूमि: सर्वजातीयानां "**पुण्यभूमि**" समाख्यां लव्धवती। आध्यात्मिकप्रेरणाया: पुण्यभूमौ भारतवर्षे व्यास-वशिष्ठ-वाल्मीकि-गौतम-कणाद-कपिलादय: ऋषिमुख्या आविर्भूय मानवानां परमकल्याणाय विभिन्नोपायं प्रदर्शितवन्त:। देवतानां लीलाभूमौ अस्मिन् भारतवर्षे सनातनधर्मावलम्बिनां सामाजिकव्यवहारे अद्यापि विवाहादिसंस्कारा: प्रचलिता: सन्ति। देवर्षिमहर्षिसाधकानामाविर्भावधन्ये भारतभूखण्डे संस्कृतशास्त्रदिष्ट्रंसंस्काराणां समुच्छेद: कदापि कल्पयितुं न शक्य:। जातीयतावादे संस्कृतसाहित्यस्यायमेव उपयोग: भारतीयैरनुभूयते।

**शब्द कुंजी :** आन्तर्जातीयतवादस्याविर्भाव: ; जातीयताबोध: ; वैदिकलौकिकसंस्कृतसाहित्य: ; व्यास-वशिष्ठ-वाल्मीकि-गौतम-कणाद-कपिलादय: ; भारतसंस्कृति: ; भारतीयजीवनस्येतिहास: । संस्कारसम्पन्नाचार: संस्कृतभाषा ;

भारतसंस्कृति: संस्कृतेन सह अङगाङिगभावेन संबद्धा एव सततं तिष्ठति। "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। एकं विना अपरस्य अवस्थानम् असम्भवम्। विश्वबन्धुत्वस्य भावना भारतीयाया: संस्कृते मुख्यङगमास्ते -

"सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया: ।
सर्वे भद्रानि पश्यन्तु मा कश्चिद् दु:खभाग् भवेत् ॥"

भारतीयभाषासमूहस्य जननीस्वरूपा संस्कृतभाषा। संस्कृतभाषा हि प्राचीनतमा भारतीया आर्यभाषा। प्राचीनभारतवर्षस्य प्रधानभाषा इयं संस्कृतभाषा। भाषायामस्यां प्राचीनभारतवर्षे रक्षितानि विविधानि साहित्यकर्माणि। साहित्यं हि समाजस्य दर्पण:। अत: प्राचीनभारतीयानां सभ्यतासंस्कृतिधर्मैतिहासादि सर्वं प्रतिफलितमत्र।
भारतस्य सामाजिकराजनैतिकार्थनैतिकाध्यात्मिकजीवनस्य वार्ता विधृता खलु वर्तते सुसम्मृद्धवैदिकलौकिकसंस्कृतसाहित्येषु।

महाकवि: कालिदासो हि भारतवर्षस्य जातीय: कवि: भारतवासिनाश्च चिरतन्या आशाया-आकाङ्खायाश्च प्रतीक:। महाकविना मनोहारिण्या भारतभूमेरनन्यया शोभया नेत्रनिर्वाणं विलभ्य अस्या भौतिकाङगानां सचेतनरूपेण चित्रणं विधाय:

राष्ट्रस्य अशेषा मनीषिण: तां प्रति उद्वुद्धा:। तस्या पृथिव्या मानदण्डो हिमालयो नाम नगाधिराजो देवतात्मरूपेण मण्डित:। तद् यथा कुमारसम्भवे –

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज: ।
पूर्वापरौ तोयनिधी वगाहयस्तित: पृथिव्या इव मानदण्ड: ॥[i]

विरही यक्ष: रामगिरिं चेतनतया विभाव्य दूतरूपं मेघं तस्य अनुमतिं प्राप्तुं कथयति –

आपृच्छस्व प्रियसखममुं तुङगमालिङगा शैलं वन्द्यै: पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥[ii]

भारतीया चिरन्तनी कल्याणभावना महाकवेरस्य राष्ट्रभावनाया मूलम्। रघुवंशे आदर्शप्रशासकानां चारित्रं तेन सम्यक् चित्रितम् -

सोहमाजन्मशुद्धानामाफलोदयकर्मणाम् । आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् । यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् । यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥
शैशवेभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धक्ये मुनिवृत्तिनां योगेनान्ते तनुत्यजाम् ॥[iii]

संस्कृतकाव्ये राष्ट्रिया दृष्टि: सर्वत्र गोचरीभवति। महाकविना कालिदासेन -

" प्रवर्ततां प्रकृतिहिताय पार्थिव: " इत्यादिना
" महीमेकातपत्राङ्का राजसिंह: प्रशास्तु न: " इत्यादिना भासकविना ,

महाकविना भारविणा –

"युक्त: प्रमाद्यसि हितादपेत: परितप्यसे ।
यदि नेष्टात्मन: पीडा मा सञ्जि भवता जनै ॥"

इत्यभिधानेन, महाकविना माघेन च

"न दवये सात्वतीसूनुर्यन्मह्यमपराध्यति ।
यतु दन्दह्यते लोकमदो दु:खाकरोति माम् ॥"
इत्यादिना अयमेवार्थ: प्रकटीकृत:।

शूद्रकविरचिते मृच्छकटिके विवरणमेवं परिलभ्यते यत् पालकनामकस्य नरपते: राज्ये प्रजाविक्षोभो जातो यस्य नायक: आसीत् शर्विलक: । स हि पालकं निहत्य आर्यकनामकं राजसिंहासने स्थापितवान् । अत: प्राचीनभारतीयनागरिकेषु राष्टियचेतना विकशित व्यराजतेति निश्चप्रचं वक्तुं शक्यते। संस्कृतनाटकेषु विशाखदत्तरचिते "मुद्राराक्षसम्" नाटके स्वदेशप्रीति: सर्वाधिकं परिलक्षयते ।

भारतवर्षस्य जातीय महाकाव्यद्वितयेपि मानवमहिम्नो जयगीतिः श्रवणपथमायाति। भारतस्यभक्तिभावना, नार्य्यचरित्रमाहात्म्यम्, आश्रमव्यवस्था, तपोवनस्य आदर्शस्वरूपञ्च वाल्मीकिप्रणीते रामायणे समुपलभ्यन्ते। श्रीरामः स्वमित्रस्य सुग्रीवस्य सर्वविधं सौख्यं साधयति। वालिं निहत्य राज्ये सुग्रीवं स्थापयति। रावणं निहत्य विभीषणं लङ्कायाः सिंहासने संस्थापयति। एतादृशाम् उदाहरणं विश्वस्य राजनीतौ नहि समुपलभ्यते। श्रीरामः शत्रुणामपि वत्सलः। स रावणमपि उद्दिश्य प्राह यत् सौपि तस्य मित्रं भवेत् । रावणे मृते रामस्य उक्तिः-"मरणान्तानि वैराणि " इति। अतएव रामायणस्य भारतीये समाजे भारतीयायं संस्कृतौ च महान प्रभावो दृश्यते।

रामायणे भगवान् विश्वामित्रः श्रीरामचन्द्रम् अवदत् – हे राम! इयं मे ज्येष्ठा भगिनी परमपावनी कौशिकी नदी। एतस्या नाम सत्यवती। भगवता ऋचीकेन सह विवाहिता पत्या सह स्वर्गगमनकाले सा लोकानाम उपकाराय देहार्द्धेन एतन्नदीरूपेन प्रवहति। इयं कुशिकवंशस्य कन्येति कौशिकी नाम्ना ख्याता। अतएव अहं ज्येष्ठाया भगिन्याः स्नेहेन आवद्धः एतस्या तटे एव तिष्ठामि।[iv] इयं कौशिकी नदी एव अधुना विहारप्रदेशे कोशीनदीनाम्ना अभिधीयते। इत्थं प्रत्येकया नद्या सह सम्बन्धम् अवधार्य भारतवर्षे वसताम् अस्माकं देशस्यास्य अन्तरात्मना अन्तरङ्गता समुदिता स्यात् तथा जातीयताबोधो बद्धमूलो भवेत्।

महाभारतं भारतीयजीवनस्येतिहासः। कौरवपाण्डवानाम् इतिहासवर्णनमेव महाभारतस्य नोद्देश्यं, महर्षि व्यासो महाभारते भारतस्य संस्कृतेः, समाजस्य, धर्मस्य च विस्तृतं वर्णनञ्चकार। महाभारतस्य शान्तिपर्वणि मानवजीवनस्य नानाविधं संकल्पानां समाधानं दृश्यते। महाभारतस्य गीतायाः भारतीयसंस्कृतौ महान् प्रभावो दृश्यते। सा विभिन्नाभिर्भाषाभि अनूदिता सम्पूर्णे विश्वे व्याप्ता वर्तते। अविस्मरणीय एव भारतवर्षस्य स्वाधीनतान्दोलने गीताया प्रभावः।

अस्माकं विचार एव न केवलं राष्ट्रहितकरोपि आचारोपि सन्दृश्यते तथा। प्रतिदिनं स्नानकाले भारतीयाः पुण्याः नद्यः मन्त्ररूपेण स्मर्यन्ते -

"गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु ॥" इति ।

अतएव संस्कारसम्पन्नाचारः राष्ट्रं स्मरति प्रतिदिनम्। पुनः जनन्या जन्मभूमेश्च सर्गापेक्षया समुतकर्षख्यापनार्थं "**जननी जन्मभूमिश्च सर्गादपि गरीयसी**" इति निरपवादं महाजनवाक्यंत्र स्मर्यन्ते। प्रसङ्गतः "**सत्यमेव जयते**" , "**वन्दे मातरम्**" , इत्यादि वाक्यमपि स्मृतिपथमायातं संस्कृतसाहित्ये जातीयतावादं स्मारयति।

भारतवर्षमिदं विभिन्नजातीयानां मानवानां मेलनभूमिः। विभिन्नधर्माचार्यानां युगे युगेत्राविर्भावादियं इयं भूमिः सर्वजातीयानां "**पुण्यभूमि**" समाख्यां लव्धवती। आध्यात्मिकप्रेरणायाः पुण्यभूमौ भारतवर्षे व्यास-वशिष्ठ-वाल्मीकि-गौतम-कणाद-कपिलादयः ऋषिमुख्या आविर्भूय मानवानां परमकल्याणाय विभिन्नोपायं प्रदर्शितवन्तः। देवतानां लीलाभूमौ अस्मिन् भारतवर्षे सनातनधर्मावलम्बिनां सामाजिकव्यवहारे अद्यापि विवाहादिसंस्काराः प्रचलिताः सन्ति। देवर्षिमहर्षिसाधकानामाविर्भावधन्ये भारतभूखण्डे संस्कृतशास्त्रदिष्ट्संस्काराणां समुच्छेदः कदापि कल्पयितुं न शक्यः। जातीयतावादे संस्कृतसाहित्यस्यायमेव उपयोगः भारतीयैरनुभूयते। यद्यपि अभिन्नधर्मत्वं धर्मगतमैक्यं वा कालविशेषे जनसमाजसृष्टौ सहायभूतं भवति ,अस्मिन्नेव भारतवर्षे महम्मदीया धर्ममुजीव्य जातिरूपेण प्रथिता आसन् तथापि विभिन्नधर्मावलम्बिनामश्रयभूमौ भारतवर्षे अभिन्नधर्मत्वं न जातीयसमाजस्थापने अपरिहार्य्योपादानं भवितुमर्हति। न केवलं

भारतवर्षे परन्तु पृथिव्या: अन्ये'पि राष्ट्रेषु निवसतां जनानां धर्मगतवैचित्र्यसत्त्वेपि ते एकजातिरूपेण प्रसिद्धिं गता:। विशेषतो भारतवर्षमिदं सृष्टिकालत: धर्मनिरपेक्षतात्मकं वैशिष्टयं ख्यापयद् विश्ववासिनां सम्माननं लभमानमादरणीयमद्यापि वर्त्तते। अतो जातिसंगठने धर्मीयचेतनाया गुरुत्वास्वीकारपक्षेपि सौभ्रात्रमैत्रीचेतनाया अपरिहार्यत्वं स्वीकर्त्तव्यम्। एतच्च सर्वं संस्कृतसाहित्ये वैशद्येनोपवर्णितमृषिभि:।

संस्कृतसाहित्ये जातीयतावादमुपजीव्य आन्तर्जातीयतवादस्याविर्भाव: राजनैतिकचित्रे दृश्यते। जातीयतावादत: आन्तर्जातिकतावाद: व्यापृतिं लभमान: विश्वायनमार्गे साहार्य्यं करोति। एतत सर्वं संस्कृतवाङमये ऋषिभि: उट्टङकितम्। "**शृण्वन्तु विश्वे अमृतस्य पुत्रा:**" – इति घोषणा एवात्र प्रामाणपदमारोढुं शक्या। अस्माकं शास्त्रेषु धर्मार्थकाममोक्षस्वरूपानां चतुर्विधानां पुरूषाणां बहुश: उल्लेख: दृश्यते , परन्तु वङगदेशस्य गौरवभूता देवतामूर्तय: शास्त्ररहस्यविद: श्रीश्रीगौराङगप्रभुपादा: पञ्चमं पुरूषार्थं "**प्रेम**" नामानं कल्पयन्त: प्रेमप्रवाहे विश्ववासिनां निमज्जयन्तश्च समग्रां मानवजातिम् एकस्यामेव छत्रच्छायायां स्थापितवन्त इति के न जानन्ति। स्वामीविवेकानन्दपादा: युगावतारस्य श्रीरामकृष्णस्यानुग्रहधन्यचरिता मानवधर्मस्य श्रेष्ठत्वं प्रतिपादयितुं समग्रे विश्वे धर्मस्य गूढार्थव्याख्यानेन विश्ववासिनां हृदयेषु विशिष्टं स्तानमधिकृतवन्त:। संस्कृतभाषा एव भारतस्य प्राणा:। भारतस्य हृदयं संस्कृतमयम्। अहो भारतसंहते: शक्तय: सर्वत्र आहिता: भवन्तु। भारतीया ऐक्यसाधना भवतु विश्वशान्ते: पथप्रदर्शिका।

*************************

---

[i] कुमारसम्भवम् , श्लो० १/१

[ii] मेघदूतम् (पू.), श्लो० १२

[iii] रघुवंशम् , श्लो० १/५ , ६ , ७ , ८

[iv] रामायणम्, आदिकाण्ड ७४/७-२०

**ग्रन्थपञ्जी :**


१. गोप:, युधिष्ठिर:। *संस्कृत सहित्येर इतिहास* । कोलकाता : संस्कृत बुक डिपो, १४०७ बङ्गाव्द:।

२. चक्रबर्ती, सत्यनारायण:। *अभिज्ञान-शकुन्तलम् (महाकवि कालिदास: कृतम्)* । कोलकाता : संस्कृत पुस्तक भाण्डार:, १९८८ ।

३. ··· । *शिशुपालवधम् (महाकवि माघ: कृतम्)* । कोलकाता : संस्कृत पुस्तक भाण्डार:, १९९०।

४. दास:, देबकुमार:। *रघुवंशम् – प्रथम: सर्ग: (महाकवि कालिदास: कृतम्)* । कोलकाता : सदेश:, १४१०।

५. ... । *संस्कृत सहित्येर इतिहास* । कोलकाता : सदेश:, १४०४ ।

६. बन्द्योपाध्याय:, उदयचन्द्र अनीताश्च। *मुद्राक्ससम् (महाकवि विशाखदत्त: कृतम्)* । कोलकाता : संस्कृत बुक डिपो, २००८ ।

७. ··· । *मृच्चकटिकम् (महाकवि शूद्रक: कृतम्)* । कोलकाता : संस्कृत बुक डिपो, २००७।

८. बन्द्योपाध्याय:, धीरेन्द्रनाथ: । *संस्कृतवाङ्मयस्य इतिहास:* । कोलकाता : संस्कृत पुस्तक भाण्डार:, २०१४।

९. बसु, अनिल चन्द्र। *अभिज्ञान-शकुन्तलम् (महाकवि कालिदास: कृतम्)* । कोलकाता : संस्कृत बुक डिपो, २००३ (चतुर्थं पुनर्मुद्रितसंस्करणम्) ।

१०. ... । *किरातार्ज्जुनीयम् (महाकवि भारवि कृतम्)* । कोलकाता : संस्कृत बुक डिपो, २००६ (पुनर्मुद्रितसंस्करणम्)।

११. ... । *भट्टिकाव्यम् (महाकवि भट्टि कृतम्)* । कोलकाता : संस्कृत बुक डिपो, १९९५।

१२. भट्टाचार्य्यः, आदित्यनाथः (सम्पादितम्) । *संस्कृतवाङ्मये जातीयताभावना (जातीया संस्कृतविद्वत्संगोष्ठी – विद्वत्सदसि परीक्षितप्रबन्धानां विवरणम् )* । वर्धमानविश्वविद्यालयः, २००१।

१३. भट्टाचार्य्यः, गुरुनाथः विद्यानिधि। *कुमारसम्भवम् (महाकवि कालिदासः कृतम्)* । कोलकाता : संस्कृत पुस्तक भाण्डारः ।

१४. भट्टाचार्यः, पार्बतीचरणः। *मेघदूत परिचय (महाकवि कालिदासः कृतम्)* । कोलकाता : संस्कृत पुस्तक भाण्डारः, १४१८ (पञ्चमं पुनर्मुद्रितसंस्करणम्)।

१५. *महाभारतम्, (वेदव्यास प्रणीतम्)* । कोलकाता : बिश्ववाणी प्रकाशनी, १३४५ बङ्गाव्द।

१६. *रामायणम् (श्रीवाल्मीकिमहामुनिप्रणीतम्)* । कोलकाता : बिश्ववाणी प्रकाशनी, १३३८ बङ्गाव्द।

१७. *रामायणम् (श्रीवाल्मीकिमहामुनिप्रणीतम्)* । निउ दिल्ली : राष्ट्रिय-संस्कृत-संस्थान, २००६ (द्वितीयं पुनर्मुद्रितसंस्करणम्)।